ओ३म्

# ॥ सामवेदसंहिता ॥

ऋष्यादिसंवलिता ।

वैदिकयन्त्रालयस्थपण्डितैर्बहुसंहितानुसारेण

संशोधिता ।

अजमेरीय वैदिक यन्त्रालये

मुद्रिता

सृष्टयब्दाः १९७२९४९००१

संवत् १९५७ वि०

॥ २ ॥ ऋषिः—१ आयुङ्क्ष्वाहिः । २ वामदेवः । ३, ८, ९ प्रयोगः ।
४ मधुच्छन्दः । ५, ७ शुनःशेपः । ६ मेधातिथिः । १० वत्सः ॥ अग्निर्देवता ॥
गायत्री छन्दः ॥ षड्जः स्वरः ॥

॥ २ ॥ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय
॥ १ ॥ दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥ २ ॥
उप त्वाजामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके अस्थिरन् ॥ ३ ॥ उप
त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥ ४ ॥ जराबोध
तद्विविड्ढि विशे विशे यज्ञियाय । स्तोमं रुद्राय दृशीकम् ॥ ५ ॥ प्रति त्यं चारु
मध्वरं गोपीथाय प्रहूयसे । मरुद्भिरग्न आ गहि ॥ ६ ॥ अश्वं न त्वा वारवन्तं
वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् ॥ ७ ॥ और्वभृगुवच्छुचिमप्नवा-
नवदाहुवे । अग्निं समुद्रवाससम् ॥ ८ ॥ अग्निमिन्धानो मनसा धियं सचेतम-
र्त्यः । अग्निमिन्धे विवस्वभिः ॥ ९ ॥ आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति
वासरम् । परो यदिध्यते दिवि ॥ १० ॥

॥ ३ ॥ ऋषिः—१ प्रयोगः । २, ५, ९ भरद्वाजः । ३, १० वामदेवः ।
४, ६ वसिष्ठः । ७ विरूपः । ८ शुनःशेपः । ९ गोपवनः । १० कामदेवः । ११
कण्वः । १२ मेधातिथिः । १३ सिन्धुद्वीप अम्बरीष त्रितआप्तः । १४ उशना ॥
अग्निर्देवता ॥ गायत्री छन्दः ॥ षड्जः स्वरः ॥

॥ ३ ॥ अग्निं वो वृधन्तमध्वराणां पुरूतमम् । अच्छा नप्त्रे सहस्वते
॥ १ ॥ अग्निस्तिग्मेन शोचिषा यंसद्विश्वं न्य३त्रिणम् । अग्निर्नो वंसते रयिम्
॥ २ ॥ अग्ने मृड महां अस्यय आ देवयुं जनम् । इयेथ बर्हिरासदम् ॥ ३ ॥
अग्ने रक्षाणो अंहसः प्रति स्म देव रीषतः । तपिष्ठैरजरो दह ॥ ४ ॥ अग्ने युङ्-
क्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥ ५ ॥ नि त्वा नक्ष्य
विश्पते द्युमन्तं धीमहे वयम् । सुवीरमग्न आहुत ॥ ६ ॥ अग्निर्मूर्द्धा दिवः ककु-
त्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥ ७ ॥ इम मू षु त्वमस्माकं सनिं



गायत्रं नव्यांसम् । अग्ने देवेषु प्र वोचः ॥ ८ ॥ तं त्वा गोपवनो गिरा जनि-
ष्ठदग्ने अङ्गिरः । स पावक श्रुधी हवम् ॥ ९ ॥ परि वाजपतिः कविरग्निर्हव्या-
न्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ १० ॥ उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ ११ ॥ कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममी-
वचातनम् ॥ १२ ॥ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये । शंयोरभिस्रवन्तु नः
॥ १३ ॥ कस्य नूनं परीणसि धियो जिन्वसि सत्पते । गोषाता यस्य ते गिरः ॥ १४ ॥

॥ ४ ॥ ऋषिः—१, ३ शंयुः । २ भर्गः । ४ वसिष्ठः । ५ भारद्वाजः । ६
प्रस्कण्वः । ७ तृणपाणिः । ८ विरूपः । ९ शुनः शेपः । १० सोभरिः ॥ अ-
ग्निर्देवता ॥ बृहती छन्दः ॥ मध्यमः स्वरः ॥

॥ ४ ॥ यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे । प्र प्र वयममृतं
जातवेदसं प्रियं मित्रं न शंसिषम् ॥ १ ॥ पाहि नो अग्न एकया पाह्यू३त द्वि-
तीयया । पाहि गीर्भिस्तिसृभिरूर्जाम्पते पाहि चतसृभिर्वसो ॥ २ ॥ बृहद्भिरग्ने
अर्चिभिः शुक्रेण देव शोचिषा । भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि
॥ ३ ॥ त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः । यन्तारो ये मघवानो जनाना-
मूर्वं दयन्त गोनाम् ॥ ४ ॥ अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः । अप्रोषिवान्
गृहपते महाँ असि दिवस्पायुर्दुरोणयुः ॥ ५ ॥ अग्ने विवस्वदुषसश्चित्रं राधो
अमर्त्य । आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥ ६ ॥ त्वं नश्चित्र
ऊत्या वसो राधांसि चोदय । अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः
॥ ७ ॥ त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः । त्वां विप्रासः समिधान दी-
दिव आ विवासन्ति वेधसः ॥ ८ ॥ आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥ ९ ॥ यो विश्वा दयते वसु होता
मन्द्रो जनानाम् । मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥ १० ॥

॥ ५ ॥ ऋषिः—१ वामदेवः । २ भर्गः । ३, ७ सौभरिः । ४ मनुः । ५

सुदीति पुरुमीढ ष्कम्भाः । ६ प्रस्कण्वः । ८ मेधातिथिर्मेध्यातिथिश्च । ९ विश्वामित्रः । १० कण्वः ॥ देवता-१-७, ९, १० अग्निः । ८ इन्द्रः ॥ बृहती छन्दः ॥ मध्यमः स्वरः ॥

॥ ५ ॥ एनावो अग्निन्नमसोर्जोनपातमाहुवे । प्रियं चेतिष्ठमरातिंस्वध्वरं विश्वस्य दूतममृतम् ॥ १ ॥ शेषे वनेषु मातृषु सन्त्वा मर्त्तासइन्धते । अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि ॥ २ ॥ अदर्शि गातु वित्तमोयास्मिन् व्रतान्यादधुः । उपोषु जातमार्यस्य वर्द्धनमग्निं नक्षन्तुनोगिरः ॥ ३ ॥ अग्निरुक्थे पुरोहितोग्रावाणोबर्हिरध्वरे । ऋचा यामिमरुतो ब्रह्मणस्पते देवाअवोवरेण्यम् ॥ ४ ॥ अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम् । अग्निं राये पुरुमीढः श्रुतन्नरोग्निः सुदीतयेछर्दिः ॥ ५ ॥ श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः । आ सीदतुबर्हिषिमित्रो अर्यमाप्रातर्यावभिरध्वरे ॥ ६ ॥ प्रदैवोदासो अग्निर्देव इन्द्रोन मज्मना । अनु मातरं पृथिवीं वि वावृते तस्थौनाकस्य शर्मणि ॥ ७ ॥ अधाह्यग्ने अधवा दिवोबृहतोरोचनादधि । अया वर्द्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ ८ ॥ कायमानोवना त्वं यन्मातॄरजगन्नपः । न तत्ते अग्ने प्र मृषे निवर्त्तनं यद्दूरे सन्निहा भुवः ॥ ९ ॥ नि त्वामग्नेमनुर्दधे ज्योतिर्जनायशश्वते । दीदेथ कण्वऋतजातउक्षितोयं नमस्यन्ति कृष्टयः ॥ १० ॥

इत्यर्धः प्रपाठकः

॥ ६ ॥ ऋषिः—१, ७ वसिष्ठः । २, ३, ५ कण्वः । ४ सौभरिः । ६ आत्कीलः । ८ विश्वामित्रः ॥ देवता—१, ४—८ अग्निः । २ ब्रह्मणस्पतिः । ३ यूपः ॥ बृहती छन्दः ॥ मध्यमः स्वरः ॥

॥ ६ ॥ देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् । उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वोदेव ओहते ॥ १ ॥ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ २ ॥ ऊर्द्ध्व ऊषुण ऊतये तिष्ठा देवो न सविता । ऊर्द्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ३ ॥ प्र योराये निनीषति मर्त्तो यस्ते वसो दाशत् । स वीरन्धत्ते अग्न उक्थशंसिनं



त्मना सहस्रपोषिणम् ॥ ४ ॥ प्र वोयह्वं पुरूणां विशां देवयतीनाम् । अग्निं सूक्तेभिर्वचोभिर्वृणीमहे यंसमिदन्य इन्धते ॥ ५ ॥ अयमग्निः सुवीर्यस्येशे हि सौभगस्य । रायईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ६ ॥ त्वमग्नेगृहपतिस्त्वंहोता नोअध्वरे । त्वम्पोता विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥ ७ ॥ सखायस्त्वा ववृमहे देवं मर्त्तास ऊतये । अपान्नपातं सुभगं सुदंससं सुप्रतूर्त्तिमनेहसम् ॥ ८ ॥

॥ ७ ॥ ऋषिः-१ श्यावाश्व वामदेवौ । २ वार्हिहव्यः । ३ वृहदुक्थः । ४ कुत्सः । ५, ६ भारद्वाजः । ७ वामदेवः । ८, १० वसिष्ठः । ९ त्रिशिरास्त्वाष्ट्रः ॥ अग्निर्देवता ॥ छन्दः-१, ३, ५—९ त्रिष्टुप् । २, ४ जगती । १० त्रिपाद्विराड्गायत्री ॥ स्वरः—१, ३, ५—९ धैवतः । २, ४ निषादः । १० षड्जः ॥

॥ ७ ॥ आ जुहोता हविषा मर्जयध्वं निहोतारं गृहपतिं दधिध्वम् । इडस्पदे नमसा रातहव्यं सपर्यता यजतम्पस्त्यानाम् ॥ १ ॥ चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे । अनूधा यदजीजनदधाचिदा ववक्षत्सद्यो महि३दूत्यं चरन् ॥ २ ॥ इदं त एकं पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व । संवेशनस्तन्वे३चारुरेधि प्रियो देवानां परमे जनित्रे ॥ ३ ॥ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया । भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मारिषामा वयं तव ॥ ४ ॥ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविं सम्राजमतिथिञ्जनानामासन्नः पात्रं जनयन्त देवाः ॥ ५ ॥ वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः । तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिन्नगिर्ववाहो जिग्युरश्वा ॥ ६ ॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः । अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ७ ॥ इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन । नरोहव्येभिरीडते सबाध अग्निरग्रमुषसामशोचि ॥ ८ ॥ प्र केतुना बृहता यात्यग्निरारोदसी वृषभो रोर-